गङ्गागर्भजातत्वात् सुवर्णमपि । इति महाभारतम् ॥)

गाङ्ग:, पुं, (गङ्गाया अपत्यं पुमानिति । "शिवादिभ्योऽण् ।" ४ । १ । ११२ । इत्यण् ।) भीष्म: । (यथा, हरिवंशे । ३२ । १११ ।
"गाङ्गं देवव्रतं नाम पुत्त्रं सोऽजनयत् प्रभु: ।
स तु भीष्म इति ख्यात: कौरवाणां पितामह: ॥"
अस्य जन्मवृत्तान्तादिकं भीष्मशब्दे द्रष्टव्यम् ॥) कार्त्तिकेय: । इति मेदिनी । गे । ५ ॥

गाङ्गट:, पुं, (गाङ्गे गङ्गातीरादौ अटति भ्रमतीति । अट् + अच् । शकन्ध्वादित्वात् साधु: ।) मत्स्यभेद: । इति शब्दरत्नावली ॥ चिङ्गिड़ि माछ इति भाषा ॥ (चिङ्गिटशब्दे विवरणमस्य ज्ञेयम् ॥)

गाङ्गटक:, पुं, (गाङ्गे गङ्गातीरादौ अटतीति । अट् + ण्वुल् ।) गाङ्गटमत्स्य: । इति शब्दरत्नावली ॥

गाङ्गटेय:, पुं, (गाङ्गे अटतीति । अट गतौ + बाहुलकात् एय: ।) गाङ्गटमत्स्य: । इति शब्दरत्नावली ॥

गाङ्गायनि:, पुं (गङ्गाया अपत्यं पुमान् । "तिकादिभ्य: फिञ् ।" । ४ । १ । १५४ । इति फिञ् ।) भीष्म: । इति त्रिकाण्डशेष: ॥ कार्त्तिकेयश्च ॥

गाङ्गेयं, क्ली, (गङ्गाया अपत्यम् । "शुभ्रादिभ्यश्च ।" ४ । १ । १२३ । इति ढक् । गङ्गाजातत्वादस्य तथात्वम् ।) स्वर्णम् । (यदुक्तं महाभारते वनपर्व्वणि ।
"यं गर्भं सुषुवे गङ्गा पावकाद्दीप्ततेजसम् ।
तदुल्बं पर्व्वते न्यस्तं हिरण्यं समपद्यत ॥")
धुस्तूर: । कशेरु । इत्यमर: । २ । ६ । ६४ ॥ मुस्तम् । इति हेमचन्द्र: ॥ (अस्य पर्य्याया: यथा, वैद्यकरत्नमालायाम् ।
"मेघाख्यं मुस्तकं मुस्ता गाङ्गेयं भद्रमुस्तकम् ॥"
गङ्गाजातजलादौ त्रि । यथा, महाभारते । ३ । ३ । ३४ ।
"योगमास्थाय धर्म्मात्मा वायुभक्षो जितेन्द्रिय: ।
गाङ्गेयं वार्य्युपस्पृश्य प्राणायामेन तस्थिवान् ॥")

गाङ्गेय:, पुं, (गङ्गाया अपत्यं पुमान् । "शुभ्रादिभ्यश्च ।" ४ । १ । १२३ । इति ढक् ।) भीष्म: । (यथा, देवीभागवते । २ । ४ । ३७ ।
"वसुदेवं विदित्वैनं सुखं भुङ्क्ष्व सुतोद्भवम् ।
गाङ्गेयोऽयं महाभाग! भविष्यति बलाधिक: ॥"
अस्य जन्मविवरणं तत्रैव २ अध्याये तथा भीष्मशब्दे विस्तरशो द्रष्टव्यम् ॥) कार्त्तिकेय: । इति हेमचन्द्र:॥ (यथा, महाभारते ।१।१३८।१३।
"आग्नेय: कृत्तिकापुत्त्रो रौद्रो गाङ्गेय इत्यपि ।
श्रूयते भगवान् देव: सर्व्वदेवमयो गुह: ॥")
इल्लीशमत्स्य: । इति त्रिकाण्डशेष: ॥ भद्रमुस्ता । इति राजनिर्घण्ट: ॥

गाङ्गेरुकी, स्त्री, (गाङ्गं जलविशेषमीरयतीति । ईर गतौ क्षेपणे च + "मृगय्वादयश्च ।" उणां । १ । ३८ । इति कु: । तत: स्वार्थे कन् गौरादित्वात् ङीष् ।) गोरक्षतण्डुला । इत्यमर: । २ । ४ । ११७ ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये । "क्षीरवृक्षफलजाम्बवराजादनतोदनतिन्दुकबकुलधन्वनाश्मन्तकाश्वकर्णफल्गुपरूषकगाङ्गेरुकीपुष्करवर्त्तिबिल्वबिल्वीप्रभृतीनि ॥"
यथास्या: पर्य्याया: ।
"गाङ्गेरुकी नागबला झषा ह्रस्वगवेधुका ।
खरवल्लरिका विश्व-वेदा गोरक्षतण्डुली ॥"
इति वैद्यकरत्नमालायाम् ॥
यथास्या गुणा: ।
"गाङ्गेरुकी करीरञ्च बिम्बीतोदनधन्वनम् ।
मधुरं सकषायञ्च शीतं पित्तकफापहम् ॥"
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये ॥)

गाङ्गेष्ठी, स्त्री, (गाङ्गे गङ्गादिनदीतटे तिष्ठतीति । स्था + क: अलुक् । गौरादित्वात् ङीष् ।) कठशर्करालता । इति हारावली । २१० ॥ नटा इति भाषा ॥

गाञ्जिकाय:, पुं, वर्त्तिकपक्षी । इति राजनिर्घण्ट: ॥

गाढं, क्ली, (गाहते स्म इति । गाह विलोड़ने + क्त: ।) अतिशय: । दृढ़म् । (यथा, आर्य्यासप्तशत्याम् । ६१० ।
"आलिङ्गति सा गाढं पुन: पुनर्यामिनीप्रथमे ॥")
तद्युक्ते त्रि । इत्यमर: । १ । १ । ७० ॥ (यथा, रघु: । ६ । ७२ ।
"श्रमफेनमुचा तपस्विगाढ़ां
तमसां प्राप नदीं तुरङ्गमेण ॥")

गाढ़मुष्टि:, पुं, (गाढ़ा दृढ़ा मुष्टिर्यस्य । दृढ़मुष्ट्या धारणादस्य तथात्वम् ।) खड्ग: । कृपणे त्रि । इति मेदिनी । टे । ६१ ॥ (दातृत्वाभावादेवास्य तथात्वम् ॥)

गाढ़ावटी, स्त्री, (गाढ़ा दृढ़ा वटी वटिका यत्र । निपातनात् पुंवद्भावाभाव: ।) चतुरङ्गक्रीड़ामध्ये क्रीड़ाविशेष: । यथा, तिथ्यादितत्त्वे ।
"नौकैका वटिका यस्य विद्यते खेलने यदि ।
गाढ़ावटीति विख्याता पदं तस्य न दुष्यति ॥"

गाणपत्य:, त्रि, (गणपतिर्गणेश उपास्यदेवो यस्य । गणपति + ण्य: । केषाञ्चिन्मते अश्वपत्यादिभ्यश्चेति ण्यापवादोऽण् । तत्र गाणपत इति साधु: ।) गणेशोपासक: । इत्यागम: ॥ (गणपतेर्भाव: कर्म्म वा "गुणवचनब्राह्मणादिभ्य: कर्म्मणि च ।" ५ । १ । १२४ । इति ष्यञ् ।) गणपतिसम्बन्धी । गणपतिभावे क्ली ॥ (यथा, महाभारते । ३ । ८५ । ६७ ।
"प्रदक्षिणमुपावृत्य गाणपत्यमवाप्नुयात् ॥")

गाणिक्यं, क्ली, (गणिकानां वेश्यानां समूह: । "गणिकाया यञिति वक्तव्यम् ।" ४ । २ । ४० । इत्यस्य वार्त्तिं इति यञ् ।) गणिकासमूह: । बहुवेश्या: । इत्यमर: । २ । ६ । २२ ॥

गाण्डिव:, पुं, क्ली, (गाण्डिर्ग्रन्थिरस्यास्तीति । गाण्डि + "गाण्ड्यजगात् संज्ञायाम् ।" ५ । २ । ११० । इति व: ।) अर्ज्जुनधनु: । (यथा, महाभारते । ३ । २३५ । ३० ।
"धनुर्ग्राहश्चार्ज्जुन: सव्यसाची
धनुश्च तद्गाण्डिवं भीमवेगम् ॥")
धनुर्मात्रम् । इति मेदिनी ॥ वे । ३६ ॥

गाण्डीव:, पुं, क्ली, (गाण्डिर्ग्रन्थि: । "इदिकारान्तादिति ।" ङीषि कृते गाण्डी । सा विद्यते अस्य । "गाण्ड्यजगात् संज्ञायाम् ।" ५ । २ । ११० । इति व: ।) अर्ज्जुनधनु: । इत्यमर: । २ । ८ । ८४ ॥ (यथा, महाभारते । ४ । ४१ । १ ।
"यन्मां पूर्व्वमिहापृच्छ: शत्रुसेनानिवर्हणम् ।
गाण्डीवमेतत् पार्थस्य लोकेषु विदितं धनु: ॥"
एतद्धनुर्हि ब्रह्मादयोऽपि आदौ धृतवन्त: । यदुक्तं तत्रैव । ४ । ४१ । ५—८ ।
"एतद्वर्षसहस्रन्तु ब्रह्मा पूर्व्वमधारयत् ।
ततोऽनन्तरमेवाथ प्रजापतिरधारयत् ॥
त्रीणि पञ्चशतञ्चैव शक्रोऽशीतिञ्च पञ्च वै ।
सोम: पञ्चशतं राजा तथैव वरुण: शतम् ॥
पार्थ: पञ्च च षष्टिञ्च वर्षाणि श्वेतवाहन: ।
महावीर्य्यं महद्दिव्यमेतद्धनुरनुत्तमम् ॥
एतच्च मानुषं प्राप्य वरुणाच्चारुदर्शनम् ।
पूजितं सुरमर्त्त्येषु बिभर्त्ति परमं वपु: ॥"
खाण्डवदाहनार्थं हि वह्निना वरुणसकाशादानीयधनुरेतदर्ज्जुनाय प्रदत्तम् । तत्कथा यथा, महाभारते । १ । २२६ । १—६ ।
"एवमुक्त: स भगवान् धूमकेतुर्हुताशन: ।
चिन्तयामास वरुणं लोकपालं दिदृक्षया ॥
आदित्यमुदके देवं निवसन्तं जलेश्वरम् ।
स च तच्चिन्तितं ज्ञात्वा दर्शयामास पावकम् ॥
तमब्रवीद्धूमकेतु: प्रतिगृह्य जलेश्वरम् ।
चतुर्थं लोकपालानां देवदेवं सनातनम् ॥
सोमेन राज्ञा यद्दत्तं धनुश्चैवेषुधी च ते ।
तत् प्रयच्छोभयं शीघ्रं रथञ्च कपिलध्वजम् ॥
कार्य्यञ्च सुमहत् पार्थो गाण्डीवेन करिष्यति ।
चक्रेण वासुदेवश्च तन्ममाद्य प्रदीयताम् ॥
ददानीत्येव वरुण: पावकं प्रत्यभाषत ।
तदद्भुतं महावीर्य्यं यश:कीर्त्तिविवर्द्धनम् ॥
सर्व्वशस्त्रैरनाधृष्यं सर्व्वशस्त्रप्रमाथि च ।
सर्व्वायुधमहामात्रं परसैन्यप्रधर्षणम् ॥
एकं शतसहस्रेण सम्मितं राष्ट्रवर्द्धनम् ।
चित्रमुच्चावचैर्व्वर्णै: शोभितं श्लक्ष्णमव्रणम् ॥
देवदानवगन्धर्व्वै: पूजितं शाश्वती: समा: ।
प्रादाच्चैव धनूरत्नमक्षय्यौ च महेषुधी ॥"
"तच्च दिव्यं धनु:श्रेष्ठं ब्रह्मणा निर्म्मितं पुरा ।
गाण्डीवमुपसंगृह्य बभूव मुदितोऽर्ज्जुन: ॥")
कार्म्मुकम् । इति मेदिनी । वे । ३६ ॥

गाण्डीवी, [न्] पुं, (गाण्डीवोऽस्त्यस्य । गाण्डीव + "अत इनिठनौ ।" ५ । २ । ११५ । इति इनि: ।) अर्ज्जुन: । इति त्रिकाण्डशेष: ॥ अर्ज्जुनवृक्ष: । इति राजनिर्घण्ट: ॥

गाता, [ऋ] त्रि, (गायतीति । गै गाने + तृच् ।) गायक: । इति सङ्गीतदामोदर: ॥ (यथा, हरिवंशे । ५४ । ११ ।
"गाता चतुर्णां वेदानामुद्गाता प्रथमर्त्त्विजाम् ॥"